तपोवनसंस्कारः रघुवंशे

वनसम्पद्भिरनुगृहीता भवति भारतभूमिः। पूर्वकाले तु भारतस्य प्रदेशेष्वधिकतमो भागो वननिबिडोऽऽसीत्। एकान्तध्यानाय शान्तिपूर्णवासाय चैतानि वनान्युपायुज्यन्त। आध्यात्मिकज्ञानान्वेषिणो महर्षिश्रेष्ठास्स्वान्वेषणे उचितवनभूमिं स्वीकृतवन्तः आसन्। एवं ते वनभूमिषु पर्णशालां निर्माय तपोऽनुष्ठानमकुर्वन्। महर्षीणामाश्रमप्रदेशाः तपोवनानीति प्रसिद्धाः अभवन्। वने यानि फलमूलादीन्यलभ्यन्त, तान्युपयुज्य, स्वात्मान्वेषणरूपेण तपोनुष्ठानमकुर्वन्नेते महामुनयः। न तु केवलं महामुनयः, अपि तु तत्कालीनाः राजानश्च वार्धक्ये वनजीवितमेवानयन्। रघुवंशे एतादृशप्रस्तावो दृश्यते च।

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्।

वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।[1]

तपोवनसंस्कृतिस्तु पवित्रा शान्तिपूर्णा, सुनिर्मला च। सा तु तपोविद्याधिष्ठानत्वात् तापसप्रवहित्रसंस्कारवाहिनी भवति। अनेन संस्कारेण सम्पन्नो जनो यं वनमधिवसति, तत् नूनं तपोवनत्वेन कीर्त्यते। तपःप्रदेशस्तु तपोवनम्। अस्माकं प्राचीनसंस्कारस्य सुप्रधानघटकरूपेण तपोवनसंस्कारः अतिष्ठत्। आर्षसंस्कारत्वेन भारतसंस्कारस्य या कीर्तिरस्ति, सा तपोवनसंस्कारेण लब्धा। भारतीयानां प्राचीनग्रन्थेषु, विशिष्य संस्कृतमहाकाव्येष्वस्य संस्कारस्य वर्णनं प्रचुरतया दृश्यते- The forest was considered essential for maintainance of the ecological balance.[2]

संस्कृतकाव्यपारम्पर्यमिति प्रतिपादिते, अस्माकं पुरतः प्रथममागच्छति कविकुलगुरोः कालिदासस्य साहिती। त्रीणि नाटकानि, त्रीणि महाकाव्यानि, एकं खण्डकाव्यं च कालिदाससाहितीति नाम्ना कीर्त्यन्ते। तेषु सर्वत्र तपोवनवर्णनं प्रचुरतया द्रष्टुं शक्यते। अभिज्ञानशाकुन्तले हेमकूटस्थं तपोवनं, भूस्थमन्यच्च। कुमारसम्भवे परमेश्वरसान्निध्येन परिपूतं तपोवनं, पार्वत्याः तपोवनान्तरं च। तपोवनसौन्दर्यं विशुद्धिं च स्वान्तरंगे परिलालितः कविपुंगवो भवति कालिदासः।

लेखनेऽस्मिन् रघुवंशे दृश्यमानं तपोवनसंस्कारमधिकृत्य प्रतिपादनं क्रियते। ग्रन्थारंभे एव एतादृशाः परामर्शास्सन्ति।

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः।
आगमैस्सदृशारंभ आरम्भसदृशोदयः।[3]

रघुवंशस्य द्वितीयसर्गे वसिष्ठाश्रमस्य वर्णनमस्ति। दिलीपः पत्न्या सह वसिष्ठमुनिं द्रष्टुं यदागच्छत्, तदा तस्याश्रमवृत्तान्तं कविः प्रतिपादयति।

रघुवंशस्यारम्भे तपसा सुसम्मानितं राजमाहात्म्यं प्रतिपादयति। प्रथमसर्गे एव वसिष्ठाश्रमस्य प्रशान्तचित्रमस्ति। यदा राजदम्पत्याश्रमं प्रविशति, तदा बहिर्वनात् चमता-दर्भा-वनमूलादीन् च स्वीकृत्य तपस्विनोऽऽश्रमं प्रत्यागच्छन्ति। तत्र ते अदृष्टाग्निना स्वीकृताः भवन्ति। प्रतिनिवृत्ताः आहिताग्नयः (तापसाः) अग्निभिः स्वीक्रियन्ते इत्यागमप्रसिद्धिः।[४]

तत्राश्रमप्रदेशे ईदृशैर्बहुभिरुत्कृष्टदृश्यैर्हृदयं विशुद्धतामातनुते। तपोवनजीवितस्य बहवो निर्मलभावाः तत्र तत्र प्रकाशिताः। कन्यकाभिर्बालवृक्षाः सेच्यन्ते। आलवाले जलं पिबतां पक्षिणां विश्वासाय सेचनानन्तरं ताः कन्यकाः वृक्षसमीपात् सद्यैव प्रतिनिवृत्ताः भवन्ति। प्रदेशेऽस्मिन् किमप्यन्यवस्तुनं प्रत्यपि ते आश्रमस्थाः अहिताचरणं चिन्तनं वा न कुर्वन्ति। लघुप्राणिनामपि हितं तत्र नितरां प्राधान्येन स्वीकुर्वन्ति। पर्णशालाङ्कणे छायायां नीवारधान्यानि संक्षिप्तानि। तेष्वङ्कणेषूपविश्य मृगाः विस्रब्धेन चर्वितचर्वणं कुर्वन्ति। प्रविष्टानतिथीनपि विशुद्धीकुर्वतः यागाग्नेः धूमप्रसरणं तत्र संभवति। तादृशे प्रदेशे पत्न्या सह राजा दिलीपः प्राविवेश। तत्र सभ्याः जितेन्द्रियाः मुनयस्तु पत्नीसमेताय तस्मै सत्कारं कृतवन्तः। आश्रमप्रदेशस्य विशुद्धिः, निर्भयता, शान्तता च एतैर्विवरणैर्लभ्यन्ते।

आश्रमप्रवेशवर्णनं सूक्ष्मरीत्यैव कालिदासेन कृतम्। प्रथमं तावत् सुदक्षिणैव रथादवारोहत्। यात्राप्रवेशौ स्त्रीणां पुरस्कृत्य करणीय इत्याचारात् भूपालो न व्यतिचलति।[५] तपोधनाः महर्षयः सर्वैरादृियन्ते। अत्र कुलगुरुः वसिष्ठः दिलीपस्यादरातिशयस्य पात्रीभूतोऽभवत्। दिलीपेनोच्यते, 'भोः कुलगुरोः, भवतो मन्त्रयागादिभिस्सर्व-विनाशेभ्यो मम राज्यं रक्ष्यते। यतः भवता विधिपूर्वकमग्निषु हविरावर्ज्यते, तदानीं शुष्कानां सस्यानां यथाविधि वृष्टिं पोषणं च लभन्ते। तत् सर्वं च भवतः प्रभावातिशयेनैव।' सस्यसम्पुष्टं देशसमृद्धिं नृपो वाञ्छत्यत्र। भूमौ जीवस्यास्तित्वं सस्यसमृद्ध्या एव। प्रकृत्या सहवर्तित्वेन मनुष्यः पूर्णतां प्राप्नोति। बैबिल् नाम्नि क्रैस्तवीयधर्मग्रन्थे एवं वदति- 'उत्पत्तिपुस्तके यहोवा तस्य सृष्टेः तृतीये दिने भूमौ वृक्षलतादीनसृजत्। अन्तिमे षष्ठे दिने मनुष्याणां सृष्टिस्तेन कृता'।[६] ग्रन्थभागोऽयं मनुष्यस्यास्तित्वं वृक्षलतादीन् परित्यज्य असाध्यमिति सत्यं प्रकाशयति।

राजा यागेन राज्यं रक्षति। यागार्जितपुण्येन प्रकृतिशक्तिभ्योऽपि भूमिं संरक्षितुं शक्नोति। मनुष्यः प्रकृतितः यदनुभूयते, तत् सर्वं त्वन्यसम्पदा प्राप्तुं सः न समर्थः। ऋषयः मन्त्रमहतादीन् भक्तिसमन्वितमुपचरितुं बद्धश्रद्धाः भवन्ति। रघुवंशोत्पन्नाः राजानः साम्राज्यस्य

सर्वविधैश्वर्यार्थं ऋषीणां, तेषां यागाद्याचारानुष्ठानादीनां च परिरक्षणं सर्वात्मना अकुर्वन्। अयन्तु पूर्वचार्यैरभिमतो रूढमूलसङ्कल्पः। सस्यसम्पदः, जलशुद्धवाय्वादयश्चान्यसम्पदा सम्पादयितुं न शक्यन्ते। अत एव सर्वदा प्रकृतिः उचितं परिचरणमर्हति। पुरातनजनसमूहः सत्यमेतत् पूर्वमेव ज्ञातवन्त आसन्। रघुकुलभूपालाः तपोवनमहत्वं ज्ञातवन्तः खलु। दिलीपेनोदीर्यते यत्-

पुरुषायुषजीविन्यो निरातङ्का निरीतयः।
यन्मदीया प्रजास्तस्य हेतुस्त्वद् ब्रह्मवर्चसम्।।७

मम सकलैश्वर्याणामाधारस्तु भवतो ब्रह्मवर्चस्सेव। मम प्रजाः पुरुषायुः पर्यन्तं जीवन्ति, अरोगगात्राः भवन्ति, ईतिबाधाऽभावैः ससुखं जीवन्ति, सर्वं च भवतो व्रतानां स्वाध्यायानां च फलेनैव। एवं दिलीपेन गुरोः प्रभावातिशयाः श्लाघ्यन्ते।

अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः।
अत्यासन्नाश्च राजानः ईतयः षट्विधाः स्मृताः।।

इति कामन्दकीयवचनम्।अत्रातिवृष्ट्यादिकमाद्यपञ्चकं सस्यविनाशहेतुत्वात् कर्षकाणां खेदावहम्। तेन कृषिसुभिक्षत्वविषये राज्ञां श्रद्धाधिक्यं गम्यते। कृषिवाणिज्यशिल्पानि त्रीणि हि प्रधानभूतानि वृत्त्युपायानि। तेषु वाणिज्यशिल्पे परकीयधनग्रहणोपायभूते, साक्षान्न वृत्तिसाधके।कृषिकरणजन्यानां पदार्थानां तैस्तैः प्रकारैः परिष्कृत्य समुचितोपभोगक्षमत्वाधानं हि शिल्पम्। एवं परिष्कृतानामपरिष्कृतानां च कृष्युत्पन्नानां वस्तूनां क्रयविक्रयावेव हि वाणिज्यम्। एवं च एतेषु त्रिषु कृषिमुपजीव्यैव खल्वितरयोरुभयोः वृत्तिरिति परस्परमुपजीव्योपजीवकभावः स्पष्टः एव। एवं च त्रिभिर्विशेषणैः प्रतिपादितेषु विषयेषु शासनाधिकारिणां श्रद्धावती मनोवृत्तिरिति स्पष्टमेवभवति। एतेनाकालमरणस्य रोगस्य मानसदुःखस्यानावृष्ट्यादीनामीतिबाधानां चोन्मूलनं स्वीय कृत्यमित्येव तदात्वे राज्ञामभिमानमिति तदर्थं यत्करणीयं तत्सर्वमपि तैरेव क्रियते कार्यते च।[५]

महारथाः राजानश्चक्रवर्तिनश्च जगत ऐश्वर्याय प्रकृतिशक्तिभ्यश्च रक्षां कांक्षयित्वा, धर्मरक्षकानां मुनीनां पुरतश्शिरांसि नमन्ति। यदि मन्त्रद्रष्टुर्भवतस्सान्निध्यं ममास्ति तर्हि, निश्चितलक्ष्यभेदकानि शस्त्राणि निष्फलानि भवन्ति। मम राज्ये सर्वसमृद्धीनां चाधारभूताः धर्मरक्षकाः मुनयो भवन्तीति दिलीपेन सः कुलगुरुः आदृतो भवति।। तपोधनानां धर्मकर्मादयो राज्यसमृद्धेराधारभूता इति सन्देशो रघुवंशे आद्यन्तं द्रष्टुं शक्यः।

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।
निर्ममो निरहङ्कारो समदुःखसुखक्षमी।।[६] इति स्मृत्यनुसारतः

ते मुनयः केष्वपि न द्वेष्टाः, सर्वजीविषु समभावनया करुणां मैत्रीं चाचरन्ति।

अत एव तपोधनाः सर्वेष्वादरणीयाः प्रियाश्चेति भगवद्गीता एतत् तपोधनानामचाञ्चल्यं, निरहङ्कारं, समभावनादीन् च व्यक्तीकरोति।

दिलीपेन स्वागमनोद्देशमुक्ते सति मुनिर्न केवलं स्वज्ञानचक्षुषा सर्वं विदित्वा राज्ञोऽनपत्यतायाः हेतुमुक्तवान्, अपि च नन्दिनीनाम दिव्यसुरभिसेवया प्रतिक्रियां च निर्दिष्टवान्। मुनिवचनं कदापि न मिथ्याभूतं भवति। शाकुन्तले कण्वमुनिना शकुन्तला यदाऽऽशिष्यते, तदा गौतमी वदति- 'भगवन् वरः खलु एष नाशिषः'[९] इति। एवमेव मुनिवचोनुसारं दिलीपोऽपत्यवानभवत्। तृतीयसर्गस्यान्तिमे लौकिक-विषयेभ्यो विरक्तस्सन् चक्रवर्तिचिह्नं सितातपत्रं च पुत्राय दत्वा देव्या सह तपोवनतरुच्छायामाश्रितवान्। इक्ष्वाकुकुलराजानां कुलव्रतमेवैतत्। कालिदासकवेः जीवनकाले पारिस्थितिकसुभद्रान्तरिक्षे या विशिष्टा तपोवनसंस्कृतिरासीत् सा संस्कृतिरद्य केवलं नामावशेषिता।

त्यागैश्वर्यतपःप्रेम्णां सम्मेलनैः शौर्यमाविर्भवति। शौर्यमिदं तु मनुष्यं सकलपरिभवेभ्यो उन्नयति। दिलीपपुत्रो रघुः विश्वजिन्नाम्नि यज्ञे सर्वं प्रदायाकारेण, विद्यया, यशसा, च प्रभावितः सन् स्वसमीपं समागतं वरतन्तुशिष्यं विधिवत् पूजयामास। विद्वांसं तपस्विनं चाग्निगृहे पुरोहितेन सह स्वीकर्तव्यमित्यर्थशास्त्रविधिः।[१०]

यद्यपि राज्ञः कौत्सेन प्रष्टुं विषयबाहुल्यमस्ति तथापि प्रथमकुशलमेवम्- 'मन्त्रप्रवीणेषु मुनिष्वग्रसरस्य भवतो गुरोः सौख्यं वा? यथा सूर्यात् लोकश्चैतन्यमावहति, तथा भवता सम्पूर्णविद्या यस्मात् सम्पादिता, सः गुरुः कुशली अपि?' कृत्स्नाय लोकाय चैतन्यदायकेन सूर्येण सह गुरुरुपमीयते। तस्मै गुरवे उचितविशेषणमेव राज्ञा दत्तम्। कायेन, वाचा, मनसा च यत् तपोधनमिन्द्रधैर्यमपाकरोति शश्वत् संहृतं, महर्षेः तत् त्रिविधं तपोधनं विघ्नैः व्ययो न कृतः? द्वितीयः प्रश्नः एवं भवति- धनेषु तपो भवत्यतितरं श्रेष्ठं धनम्। अनेन धनेन देवभूपाल इन्द्रोऽपि बिभ्यति। उपवासादिव्रतैः कायिकतपः, मौनवेदपाठादिभि-र्वाचिकतपः, तन्त्रोपासनादिभिर्मानसिकतप इति तपत्रयमस्ति। तपोधनाः धर्मरक्षकाः। वानप्रस्थरक्षा च राजधर्मो भवति। धर्मनीतिबोधैरधिष्ठितं भवति राजशासनम्। अत एव धर्मापचयो राज्ञा कदापि न करणीयः। यदि तपोधनानां रक्षा यथाविधिः नृपैः न क्रियते तर्हि ते राजानोऽकीर्तिवन्तोऽप्रतापिनश्च भवेयुः। तथा राज्यश्रेयोऽस्तं प्राप्स्यति। एवं मुनिशापग्रस्तेषु भूपालेषु हरिश्चन्द्रः, ययातिः, पाण्डुः, दशरथादयश्चान्तर्भवन्ति। विश्वामित्रमुनिना शप्तो हरिश्चन्द्रस्तु राज्यपत्नीपुत्राणां विनष्टमनुभूयान्ते पितृवनपालकोऽभवत्। असुरगुरुणा शुक्राचार्येण शप्तो ययातिरकाले

जरानरादिभिः वृद्धत्वं प्राप्तः। मुनिशापेन दशरथोपि पुत्रवियुक्तस्सन् दिवंगतोऽभवत्। किन्तु धर्मरक्षको रघुः मुनेरनिष्टस्य पात्रीभूतो न बभूव। मुनिं प्रति सौख्यप्रश्नानन्तरं तपोवनपरिस्थितिमधिकृत्य पृच्छति। बहुकार्यनिरतोऽप्याश्रमपादपानधिकृत्य प्रष्टुं सः न विस्मृतवान्।

आधारबन्धप्रमुखैः प्रयत्नैः
संवर्धितानां सुतनिर्विशेषम्।
कच्चिन्न वाय्वादिरुपप्लवो वः
श्रमच्छिदामाश्रमपादपानाम्।।[१२]

कस्यचन बालवृक्षस्यापि नाशस्तपोवनवासिभिः सोढुं न शक्यः। यथा जनकः स्वपुत्रान् संवर्धयति, तथा आधारबन्धादिभिः प्रयत्नैरतीवश्रद्धया राजा तरून् संरक्षन्ति। इत्थं पुत्रसमानानां क्लान्तापहर्तृणां वोऽऽश्रमपादपानां कुशलं किम्? तेषां वाय्वादिभि-रुपप्लवैर्विनाशत्वं प्राप्यते वा? यद्यपि गुरुं विनाऽन्ये मुनयः, शेषशिष्यप्रभृतयश्च भवन्ति तथापि प्रथमतया राज्ञा वृक्षलतादीनां सौख्यमेवान्विष्यते।

छायामन्यस्य कुर्वन्ति, तिष्ठन्ति स्वयमातपे।
फलन्त्यपि परार्थाय वृक्षाः सत्पुरुषा इव।।[१३]

एवं सत्पुरुषतुल्यवृक्षाणां संरक्षणमवश्यं कर्तव्यम्। अन्यवृक्षपक्षिजन्तुविशेषाः तु मनुष्यतुल्या उत तदुपर्येव स्नेहादरादीनां पात्रता तेषामित्यस्योत्तमदृष्टान्तो भवति रघुवंशस्य पञ्चमसर्गस्थ भागोऽयम्। वृक्षसंवर्धनं परिरक्षणं च प्राचीनैः पुण्यरूपेण परिकल्पिते। यत्र फलसमृद्धं क्रीडोद्यानमस्ति, तत्र देव-ऋषि-अप्सर-यक्षादयः वत्स्यन्तीति वृक्षायुर्वेदः।[१४]

गौतमबुद्धसन्देशेषु प्रायः पारिस्थितिकं तत्त्वमन्तर्भवति। बुद्धेनोच्यते यत् 'सूर्यप्रकाशेन लालितानि पर्णानि पश्यन्तु। युष्माभिः कदापि प्रशान्तोद्बुद्धहृदयेन पर्णस्य हरिताभा हृदयपूर्वं दृष्टा किम्? हरितच्छायेयं जीवस्यात्मुतेष्वेका भवति। युष्माभिः इतःपर्यन्तमदृष्टाश्चेदिदानीमेव तथा कुर्वन्तु।'[१५]

यथाऽऽश्रमवृक्षास्तथा आश्रममृगाश्चात्र बहुप्राधान्यमावहन्ति। यज्ञक्रियादिभिः पवित्रीभूतेऽऽश्रमान्तरीक्षे एकैकोऽप्यतीव श्रद्धया सज्जीकृतः। यद्यपि क्रियानिमित्तेषु कुशेष्वाश्रमस्थाः मृगाः नितरां तत्पराः अभवन्, तथापि वत्सलत्वात् मुनयस्तु तान् तस्मात् न निवारयन्ति। ईदृशपरिरक्षणात् पुत्रवत् तेषामाश्रमवासिनामङ्केषु मृगपोतकानां नाभिमाला निपतन्ति। राजा पुनरपृच्छत्, यत् तासां मृगीणां प्रसूतिरनघा काचित्। तत्राश्रमाङ्कणेष्वेव ते मृगपोतकाः मन्दमन्दमुत्थापयन्ति, शनैर्शनैर्गमनं च परिशीलयन्ति। अतः मृगपोतकानां

सौख्यं च तत्र बहुप्राधान्यमस्ति। वनप्रदेशेषु प्रकृत्या सह जीवितं नयतां मुनीनां संस्कारविशेषः कालिदासेन रघुवंशे उपवर्ण्यते। मनुष्यप्रकृत्योः पारस्परिकत्वस्योत्तमदृष्टान्तः एतद्द्वारा कविना चित्रीक्रियतेऽत्र।

तदनन्तरं राज्ञा तीर्थजलमधिकृत्य परिचिन्तयति। तीर्थजलस्य बहून्यावश्यकानि सन्ति। यैः जलैः व्रतस्नानं निवर्त्यते, येन पितृणां तर्पणं निवापाञ्जलयश्च क्रियन्ते, अतः तेन पृच्छ्यते यत्, उञ्छषष्ठाङ्कितसैकतानि तानि तीर्थजलानि शिवानि किम्? इति। धान्याहरणसमये सम्पादितान्यवशिष्टधान्यानि भवन्त्युञ्छाः। उञ्छवृत्तिना कश्चन सूर्यलोकं प्राप्नोतीति परामर्शोऽस्ति।[१६]

उटजेषु तपस्विनामुपजीवनमेतेन क्रियते। यः किं सम्पादयति, तस्य सम्पदः षड्भागेष्वेकः नृपाय दातव्यः। उञ्छस्यायं राजोपभोगो मुनयः पितृनिवापे नदीतीरे समर्पयन्ति। एवं चेत् धान्यानां ग्रहादिबाधा न सम्भवति। नदीतीरे सुलभतया पवित्रतया च तानि उञ्छषष्ठानि संरक्ष्यन्ते। राज्ञे कियत् दातव्यं, नदीतीरनिक्षेपेण तदधिकं च तत्रोत्पादयेत्। वनवासिनोऽपि मुनयस्स्वकीयदायत्वं निर्वहन्ति। श्रेष्ठानि तानि तीर्थस्थानान्यधिकृत्य च राजा एवं कुशलमाचरति।

एकैकेषु वनविभवेषु च राज्ञः श्रद्धास्तीति दृश्यते। नीवारस्तु वनोत्पन्नं धान्यं भवति। अतिथिपूजासु तत्परैराश्रमवासिभिस्समये समये आगताः अतिथयः एतैर्धान्य-भोजनैस्सत्क्रियन्ते। अतः नीवारस्य संरक्षणं समृद्धिं चाधिकृत्य राज्ञश्श्रद्धावश्यं भवितव्या। तानि धान्यानि जानपदैः कटङ्करीत्यैराक्रम्यते न? इति तेन पुनरन्विष्यते। यद्यपि सर्वराज्यकार्येषु राजा व्यग्रचित्तः तथापि भूपालः केवले तपोवनविषये च यावन्मात्रं तत्परो भवतीति विस्मयकरमेव। राज्यस्य क्षेमैश्वर्यादयस्तु मुनीनां तपोनुष्ठानैः समार्जिताः भवन्ति। तपस्विनस्स्वानुष्ठानैर्लोकश्रेयः विभावयन्ति। ते लोकान् छायामृतैश्च प्रदीयमानान् वृक्षानिव भवन्ति। विषयविरक्तो भूत्वा केवल-फलमूलादीन् भक्षयित्वा तपोधनसंपद्भिरेव तैस्समस्तलोकानां सुखामृतं प्रतीयतेति दर्शनं कालिदासेन स्वग्रन्थेष्वाद्यन्तं विस्तार्यते।

पुरा पृथिव्यप्तेजादिभ्यः पञ्चभूतेभ्यः प्रपञ्चवस्तूनामुत्पत्तिरिति प्रख्यापयन्तः ऋषिवर्याः मनुष्यप्रकृत्योश्चैक्यभावं व्यक्तीकुर्वन्ति। वृक्षाः मनुष्येण सह सदृश इत्यर्थे केचनभागाः बृहदारण्यके दृश्यन्ते।

यत् वृक्षाः वृक्णः रोहति मूलान्नावतरः पुनः।
मर्त्यः स्वित् मृत्विना वृक्णः कस्मात् मूलात्प्ररोहति।।[१७]

पर्णानि मनुष्यरोम्णा सह, वृक्षत्वक् मनुष्यत्वचा सह चोपमीयेते। यद्यपि वृक्षाः छिद्यन्ते,

तेषां मूलात् किसलयाः पुनराविर्भूयन्ते। तथापि मनुष्यस्येहलोकबन्धः केवलमत्यौ पर्यवस्यति। पादमूलात्, शिरोऽग्रात् वा मनुष्यस्य पुनराविर्भावो नास्त्येवेति बृहदारण्यकः। सर्वे जन्तवः सामान्यतया चैतन्यमावहन्ति। किन्तु मनुष्यमपेक्ष्य सस्यचेतना परोपकारप्रदा महत्तरा च।

वनवासवेलायां रामादयोऽगस्त्याश्रममगच्छन्। महत्तरो भवत्यगस्त्यस्य प्रभावः। 'मुनिनां दीप्ततेजसां रामः ददर्शे' ति[८] वाल्मीकिरामायणं तमधिकृत्य प्रस्तौति। सूर्यमार्गं प्रतिरुध्य स्थितो विन्ध्यापर्वतोऽगस्त्याज्ञया स्वोन्नतिं ह्रस्वीचकार। प्रकृतिशक्तिष्वपि स्वाधीनं कर्तुं तपोधनाः महर्षयः प्रभवन्ति। वनवासोऽगस्त्यमुनिना सार्कं यापयितुमेव रामस्य मुख्याभिलाषमिति रामायणे वदति।

अखर्वपर्वगर्तेषु विच्छिन्नो यस्य वारिधिः।
हा स एव मुनेः पाणिरधस्ताद्विन्ध्यभूभृतः।।[९]

अचञ्चलाः पर्वताः अपि महर्षीणामन्तर्गतं ज्ञात्वा प्रवर्तन्तेत्यनेनाचेतनानां गिरीणां च जीवचैतन्यमस्तीत्यवगन्तुं शक्यते।

अयमभिनवमेघश्यामलोत्तुङ्गसानु-
र्मदमुखरमयूरीमुक्तसंकेतकेकः।
शकुनिशबलनीडानोकहश्री
स्निग्धवर्त्मा वितरति बृहदश्मा पर्वतः प्रीतिमक्ष्णोः।।[१०]

इति पर्वतो नयनाभिरामश्च भवति। केवलमृत्तिकया शिलया च स्वाभाविकेना-विर्भूतानां गिरिप्रभृतीनां च सत्ता अस्तीति कालिदासकाव्येभ्योऽवगन्तुं शक्यते। पारिस्थितिकं सौन्दर्यं विभवं च विस्तारयन्तः पर्वताः विभवसंरक्षणस्यावासव्यवस्थायाश्च प्रभवकेन्द्राः भवन्ति।

न केवलं मुनीनां, अपि तु मुनिपत्नीनामपि दिव्यत्वं कविना कल्प्यते।

अत्रात्रिपत्न्यानसूयया दत्ताभिरतिशयसुगन्धलेपनवस्त्राभरणादिभिश्च चमत्कृता सीताधिकरमणीयत्वं प्राप्तवती। 'न कान्तमपि निर्भूषं विभाति वनितामुखम्' इति भामहोक्तानुसारं सीता दिव्याभरणविशेषैः पूर्वाधिकचमत्कृता। तेषां वस्त्रादीनामतिशयित-गन्धेन कुसुमासिक्ताः भ्रमराः तत्स्थानं त्यक्त्वा सीतासमक्षं प्राप्ताः भवन्ति।

इदं दिव्यं वरं माल्यं वस्त्राभरणानि च।
अंगरागं च वैदेही महार्हमनुलेपनम्।।
मया दत्तमिदं सीते तव गात्राणि शोभयेत्।

अनुरूपमसंक्लिष्टं नित्यमेव भविष्यति।[२१]

इति वाल्मीकिरामायणं तदधिकृत्य प्रस्तौति।

लङ्कायाः प्रतिनिवृत्तवेलायां श्रीरामस्सीतां प्रत्यगस्त्यमुनेः भूम्याः स्थानं दर्शयति। तं प्रदेशं भौमस्थानपरिग्रहमिति निर्देष्टुं हेतुरस्ति। अगस्त्यो नक्षत्ररूपेण नभस्यपि सविशेषस्थानमलंकरोति। मुनिरयं देहेनैकेन स्वस्थानेऽधिकारं करोति, अन्येन तपश्चर्यते च। अगस्त्यशरीरेऽगस्त्य नक्षत्रोदयेन भूमेः कलुषजलं प्रसादयति इत्यागमः। तस्याश्रमादुद्धृतैः त्रेताग्निधूमैः (दक्षिण-गार्हपत्य-आह्वनीय) रामान्तःकरणात् रजोगुणं स्वयमपाकृत्य चित्तं नितरां प्रकाशमानमभवत्। होमाग्ने-रनल्पाः विशेषताः सन्ति। होमाग्निनान्तरिक्षं पवित्रीक्रियते। अधुनातनकाले तु व्यावसायिकशालाभ्यो निर्गतैः विषधूमादिभिरन्तरिक्षं विषलिप्तं भवति। एवमेव 'धूमपानमन्तरिक्षे बहुविधमलिनता-मुत्पादयति। लक्षात्परं विषपदार्थाः एतेनान्तरिक्षे व्याप्यन्ते। अनेन धूमपानेन श्वासकोशान्तर्भागे व्याप्नुवन् विषपदार्थः निक्कोटिटन् भवति। यदि तत् रक्ते लीयते, तर्हि मनुष्याः बहुविधरोगाणामधीनाः भवेयुः।[२२] एवं वैविध्यमालिन्यनिवारणाऽभावे विविधानि दूष्यफलानि प्रादुर्भवन्ति। तदानीन्तनकालस्याश्रमान्तरिक्षं तु विशुद्धाः निष्कपटभावस्य च परिपूतानि चित्राणि, अनुवाचकहृदयेष्वनुपमशान्तिं वितनोति।

महर्षयः भौमदेवता एव। तेषां दिव्यप्रभावादयो देवानप्यतिशयं कुर्वन्ति। मार्कण्डेयमुनेराश्रमस्तस्योत्तम दृष्टान्तो भवति। एकदा महान् तपस्वी सः पञ्चाप्सरस्सु आकृष्टोऽभवत्। सः स्वतपोबलेन कश्चन दिव्यसरः, तस्यान्तर्भागे बाह्याददृष्टं रहस्यहर्म्यमेकं निर्माय, अप्सराभिस्सहाभिरम्य तत्रोषितवान्। मेघजालमध्येऽस्य मुनेः चन्द्रबिंबसदृशं पञ्चाप्सरो नाम क्रीडासरस्सर्वानतिशेते।

पञ्चाप्सरोनाम विहारवारी
आभाति पर्यन्तवनं विदूरा-
न्मेघान्तरालक्ष्यमिवेन्दुबिंबम्।[२३]

इति कविना सरः उपवर्ण्यते। स्वशीलैस्सौम्यस्सुतीष्णमहर्षिरतितीष्णातपे पञ्चाग्निमध्ये तपः कुर्वन्तं तं दृष्ट्वा देवाधिपतिरिति भीतचित्तो बभूव। रामागमनं तेन मुनिना पूर्वमेव ज्ञातम्। सोक्तवानेवं, 'हे वीर, त्वमेव प्रतीक्षमाणः, अहं महीतले देहं त्यक्त्वा इतो दोवलोकं नारोहे'[२४] इति।

आहिताग्नेश्शरणार्हश्शरभंगमहर्षिणोऽऽश्रमप्रदेशः अतिविशुद्धिमावहति। तेन मुनिना बहुकालं समिधाग्निं सेवयित्वा, अन्ते मन्त्रविशुद्धं स्वं शरीरमप्यग्नावर्पितम्। व्रतचर्यया-

चारनिष्ठया च वृद्धावस्थायां तस्य शरीरमपि समिद्वत् शुष्कप्रायमभवदिति कविना दृश्यते। 'सुप्रभाभरणं देहं' इति वाल्मीकिरामायणम्। पश्चात्तं मुनिमिवाश्रमपादपास्ते छायया फलेन चातिथिसेवामाचरन्ति। वृक्षाणां छायादानं नितरां श्रेष्ठं भवतीति बुद्धस्य महायानप्रस्थानम्।

अत्रिमुनेराश्रमप्रदेशः अभौमः अलौकिकश्च। दिव्यर्षिषु प्रमुखस्यास्याश्रमे सर्वे जन्तवः भयातीताः भवन्ति। तत्र अपुष्पिताः अपि वृक्षाः फलसमृद्धिं ददति। सर्वं चात्रिमुनेरत्युन्नतवैभवान् प्रदर्शयति। अत्रिपत्न्यनसूयाऽप्यसाधारण-प्रभावयुक्ता वनिता भवति। सप्तर्षयः स्वहस्तैस्सुवर्णकमलानि कुतोऽवचीयन्ते, या नदी त्रिनेत्रस्य मौल्यां परिशोभते, तामाकाशगंगां तापसानामभिषेकार्थं स्वतपोबलेनात्रिपत्नी भूमौ स्रावयतीति कथास्ति। यत् तस्मिन्कालेऽनावृष्ट्या दशवर्षपर्यन्तं भूमिरतीवशुष्का आसीत्।

ऋषयो वीरासने ध्याननिमग्नाः भवन्ति। तद्वत् तपोवनवृक्षाः वेदिमध्ये उपाविश्याचञ्चलावस्थायां योगाधिरूढाः इव विभान्तीति कविनोत्प्रेक्ष्यते। ध्यानस्य योगस्य च प्राधान्यं तदानीन्तनकाले प्रचुरतया आस्ताम्। आधुनिककाले तु योगादीनां महत्वं जनैरंगिक्रियत इति दृश्यते। प्रायोऽस्वस्थं मानवमात्मीयं भौतिकं च स्वास्थ्यं प्रददातुं योगादयस्समर्था इति शास्त्रमप्यंगीकरोति।

अन्यान् सर्गानपेक्ष्य त्रयोदशे सर्गे तपोधनास्तपोवनानि च नितरां प्राधान्येन कविना प्रतिपादितानीति द्रष्टुं शक्यते। रावणवधानन्तरं सीतया सह स्वनगरीं प्रतिनिवृत्तवेलायां सीतासामीप्यादधिकतयैतानि तपोवनानि राममानसं ह्लादितानि।

चतुर्दशसर्गे वाल्मीक्याश्रमपरिसरे एव रामाज्ञया सीता परित्यज्यते स्म। सर्वैस्तिरस्कृतायास्तस्या-स्तपोवनमभयस्थानमभवत्। केवलस्या ल्पशरीरस्य पक्षिणो व्यथामसहमानो महर्षिर्वाल्मीकिर्गर्भभरालसां तां साध्वीं स्वदुहितरमिव स्वीकृतवान्।

'यथा वदन्तीह महाप्रदानं सर्वेषु दानेष्वभयप्रधान' मिति[५] ब्रह्माण्डपुराणमभयस्य महत्वमुद्घुष्यते। मुनिना सीतां प्रत्युक्तानि सान्त्वनवचनानि श्रद्धेयानि। तेषु वचस्सु आश्रमः, परिसरस्तत्रत्याः क्रमनियमाश्चान्तर्भवन्ति। मुनिर्वदति उटजेऽस्मिन्, 'आपदं विना भवत्याः उषितुं शक्यते। आश्रमोऽयं सीतायाः न केवलमभयस्थानं, अपि तु स्नेहपरिचरणसुरक्षादीनां च सङ्केतः चायम्।' तत्र यथासमयं ऋतुषूत्पन्नानि फलानि, स्वयमाविर्भूतानि धान्यानि चाहरन्ति, इत्यनेन सेवनस्य महत्वं चात्र कविनोद्घुष्यते। महर्षिस्तां वदति, यत् 'भवत्याः आकारबलानुसारमुचितघटमादाय यदा बालवृक्षा सेच्यन्ते तदा पुत्रसमानमेकं पवित्रबन्धं तस्मात् लप्स्यती' ति। पुत्रलाभात् पूर्वं तेषां वृक्षाणां कृते पुत्रसमानाचरणैः तव प्रीतिं वर्धयेत्।

बालवृक्षसंवर्धनेन बहुपुण्यं आत्मतोषं च प्राप्तुं अर्हतीति एतैः कविना बोध्यते। शाकुन्तलस्य चतुर्थेऽङ्के वृक्षाणामासेचनेन जलपानमकुर्वती शकुन्तलां विस्मर्तुं न शक्यते। सीतादेव्याः प्रकृति सौन्दर्योत्सुकतामधिकृत्य वाल्मीकिरामायणे तत्र तत्र वर्णनमस्ति। 'गिरिशिखरमत्यानन्देन सीतया दृष्टमासीत्, स्वानन्दाश्रुधारया भक्तिनम्रा सा नदीमभिवन्द्यते स्म। तया गजपोतकाः लालिताः, सारसदम्पतीरनुगृहीता च।'[२६]

रघुवंशस्य पञ्चदशसर्गे यज्ञविघ्नकारिणं लवणासुरं हन्तुं शत्रुघ्नो गच्छति। असुरनिवारणं कर्तुं मुनयोऽसमर्थाः न, किं न साध्यते तपोधनैः? किन्तु यज्ञरक्षा राजधर्म इत्यनेन महर्षिणां रक्षा राज्ञि निक्षिप्ता। धर्मेषु श्रेष्ठं राजधर्ममिति महाभारतम्।

शत्रुघ्नो यात्रामध्ये रात्रौ एकस्सन् वाल्मीक्याश्रमे वसति। आश्रमोऽयं पवित्रं शान्तं चा-तनुते। परितश्शिरांसि उन्नयित्वा तिष्ठद्भिर्निर्भयैर्मृगैस्तस्य कौतुकभावस्संवर्धितः। मुनिस्तस्मै राजोचितभक्ष्य-पेय-शयनासनादीनि दत्वा सत्करोति। वने राजोचितवस्तूनां लभ्यता कुतः? तथापि एवंविधविशिष्टसत्कारं कर्तुं तपस्विप्रभावः एव समर्थः। रामायणे वाल्मीकिना वन्याहारैस्सत्कारः कृत इति इमं सन्दर्भमधिकृत्य संक्षिप्यते।

वन्याहारस्य वैशिष्ट्यं सर्वैरंगीक्रियते। प्रकृत्याहारोऽतिमहनीयोऽरोगपूर्णश्च। यः प्रकृतिनियममनुसृत्य जीवति, सः रोगात् विमुक्तो दीर्घायुष्मांश्च वर्तते। सस्याहारेण सत्वगुणाधिक्यं क्रूरविचारविमोचनं न साधयन्तीति गान्धिसूक्तयो वदन्ति।

न केवलं भूमौ मरीचादयः महर्षिण अपि तु ज्योतिर्मण्डलेऽपि ते सविशेष-स्थानमलंकुर्वन्ति। तेषामनुग्राहाशीभिः राजाऽयोध्यया सह शुशुभे।

रघुवंशकाव्ये आद्यन्तं बहूनि तपोवनानि वर्णितानि। यद्यपि काव्यं राजवंश-वर्णनापरं भवति, तथापि तपोवनान्यपि मुख्यप्रदेशरूपेणैव वर्णितानि भवन्तीति द्रष्टुं शक्यते।

अस्माकं कवयो वदन्ति, यत् तपोवनं शान्तरसैः विराजतेति। शान्तः परिपूर्णतायाः रसो भवति। तत्र आदित्य-अग्नि-जल-वायु-स्थलाकाश-वृक्ष-लता-पक्षिमृगादीनां च चेतनानां परिपूर्णमेलनं दृश्यते। तत्रत्यां परिस्थितिं प्रति मनुष्यस्य विच्छेदो विरोधो वा नास्त्येव।

१ रघुवंशः - ९ - ७

२ Conteperory india - Text book in Geography for Class X - NCERT p. 6

३ रघुवंशः - ९ - १४

४ कुट्टिकृष्णमारार् - रघुवंशम् - गद्यपरिभाषा - मारार् साहित्य प्रकाशन् - २००१ पृ. ४०



५ कुट्टिकृष्णमारार् - रघुवंशम् - गद्यपरिभाषा - मारार् साहित्य प्रकाशन् - २००१ पृ. ४१

६ के सि सि सि बैबिल्- विव. बैबिल् कम्मीषन्- ओरियन्टल् सेन्टर्- कोच्चिन् पृ. ७

७ रघुवंशः - ङ - ५९

८ पुन्नश्शेरि नीलकण्ठशर्मा- रघुवंशप्रभाषणम्- Govt. Sanskrit College committee, Thripunithura- 1993- p. 32

९ भगवद्गीता - ज्ञ्ञ्ङ - १३

१० अभिज्ञानशाकुन्तलम्- चतुर्थोऽध्यायः

११ कुट्टिकृष्णमारार्- रघुवंशम्- गद्यपरिभाषा - पृ. १३३

१२ रघुवंशः - ञ - ६

१३ नारायण रामाचार्य- सुभाषितरत्नभण्दागरम्- काव्यतीर्थ्-द्वितीयसंस्करण्- २००३ चौखम्बा संस्कृत सीरीस् ओफीस्- वीराणसि- पृ १३६

१४ डा. एन् वि पि उण्णित्तिरि- वृक्षायुर्वेदग्रन्थङ्ङल् ओरु पठनम्- के.भा.इ- तिरु.२००७ - वृक्षायुर्वेदम्- १- १- २१

१५ तच्चाथ ह्मार्- वुद्धन्टे जीवचरित्रम्- वेलुत्तमेघङ्ङल्- विव. के अरविन्दाक्षन्-

१६ वेट्टम् माणि- पुराणिक् एन्सैक्लोपीडिया- करन्ट् बुक्स्- १९६४- पृ. १३६५

१७ डी श्रीमान् नम्पूतिरि- उपनिषद् सर्वस्वम्- बृहदारण्यकम्- ३- ९- ४ साम्राट् पब्लिकेषन्- तृश्शिवपेरूर्- पृ. २२४

१८ वाल्मीकिरामायणम्- अरण्यकाण्डः - सर्गः १२- श्लो. २१

१९ सुभाषितरत्नभण्दडागारम्- पृ २१७

२० सुभाषितरत्नभण्दडागारम्- - पृ १८०

२१ वाल्मीकिरामायणम्- अयोध्याकाण्डः - सर्गः ११८- श्लो. १८,१९

२२ सुरेष् मण्णारशाला- परिस्थितियुटे निजस्थिति- पृ १२३

२३ रघुवंशम्- ज्ञ्ञ्ङ्ङ - २६

२४ वाल्मीकिरामायणम्- अरण्यकाण्डः - सर्गः ७ - श्लो. ७

२५ सुभाषितसाहस्रि- पृ. २९५

२६ काका कालेल्कर् - जीवनलीला- पृ. २१९